International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 180-183
© 2022 IJSR
www.anantaajournal.com
Received: 25-05-2022
Accepted: 28-06-2022

**Swapan Kumar Debsharma**
Ph.D., Research Scholar, School of Sanskrit & Indic Studies (SSIS), Jawaharlal Nehru University, New Delhi, India

**Corresponding Author:**
**Swapan Kumar Debsharma**
Ph.D., Research Scholar, School of Sanskrit & Indic Studies (SSIS), Jawaharlal Nehru University, New Delhi, India

# संस्कृतसाहित्ये नीतेः मनोवैज्ञानिकं मूल्याङ्कनम्

**Swapan Kumar Debsharma**

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i4c.1827

**सारः**
नीतिशास्त्रेषु वैशद्येन नीतेः चर्चाः सन्ति। तान् ग्रन्थान् व्यतिरीच्य संस्कृतसाहित्ये दृश्य-श्रव्य काव्येष्वपि नीतिविषयकाः पर्यालोचनाः वैशद्येन दरीदृश्यते। शोधपत्रेऽस्मिन् सर्वादौ नीतेः स्वरूपं प्रतिपादितम्, तत्पश्चात् नीतिकाव्यनीतिशास्त्रयोर्मध्ये भेदः प्रदर्शितः, तदन्तरं नीतिकाव्यस्योद्भवविकासश्च विषये किञ्चित् दृष्टिपातः कृतः। शोधपत्रेऽस्मिन् कतिपयग्रन्थानवलम्ब्य नीतेः मनोवैज्ञानिकं मूल्यांङ्कनं प्रतिपाद्यतम्। तेषु ग्रन्थेषु नीतिशतकम्, अभिज्ञानशाकुन्तलम्, मृच्छकटिकञ्चादि।

**कूटसंकेतः** नीतिः, संकृतसाहित्यम्, मनोविज्ञानम्, श्रेयप्रेयः, सदाचारः, दुराचारः, वेदः, नैतिकम्, अनैतिकम्।

## प्रस्तावना

### नीतेः स्वरूपम्

णीञ् (नी) प्रापणे इत्यस्माद्धातोः स्त्रीत्वे क्तिन् प्रत्यये कृते निष्पन्नोयं नीतिः शव्दः। यस्यार्थः निर्देशनं, दिग्दर्शनम्, आचारः, व्यवहारः, औचित्यम्, शालीनता, इत्यादयः भवन्ति। वास्तवतः नैतिकतायाः अभिप्रायः यत्- येन् मर्गेण मानवानां लौकिकपारलौकिककल्याणः भवति, समाजे स्थिरता आयाति, शान्तिः परिव्याप्ता भवति च। नीतिः वस्तुतः एका आचारसंहिता भवति। यत्र कर्तव्याकर्तव्यविषये निर्णयं कर्तुं समर्थः भवति मानवः। शुक्राचार्यः नीतिं परिभाषयति- नयनान्नीतिरुच्यते[i] उचितसमये उचितस्थाने उचितकार्यं यया रीत्या क्रीयते सैव नीतिः कथ्यते। नीतेः स्वरूपमित्यत्र समाजेन सह नीतिशास्त्रस्य कः सम्बन्धः? एवञ्च समाजेन सह व्यक्तेः कः सम्बन्धः? इति जिज्ञासा मनसि उत्पद्यते। वयं जानीमः व्यक्तिं विना समाजः समाजं न कथ्यते तद्वत् समाजं विना व्यक्तिः आधारहीनः भवति। अतः द्वयोर्मध्ये अन्योन्याश्रयसम्बन्धः वर्तते। समाजं विना व्यक्तेः नैतिकमूल्याकनं नैव भवति। व्यक्तेः नैतिकमनैतिकम्, शुभाशुभः, उचितमनुचितम्, सदगुणः-दुर्गुणादिविषयाणां ज्ञानं समाजैव भवति।

पाश्चात्यदार्शनिकः अरस्तुः कथयति यत्- मनुष्यः समाजिकप्राणिः तस्य पूर्णता समाजे एव भवति। समाजं विना तस्य अस्तित्वमेव नास्ति, तस्य पूर्णता निमित्तं अपरस्यावश्यकता भवति। ईश्वरः स्वमेव पूर्णः अतः तस्य नैतिकाचरणस्यावश्यकता एव नास्ति। समाजे कस्यचिताचरणस्य मूल्याङ्कणं भवति चेत् व्यक्तेः नैतिकाचरणस्य मूल्याङ्कणं भवति। नीतिशास्त्रमाचारशास्त्रमपि कथ्यते। मनुष्याणां कृते आचारस्य विशेषमहत्वं वर्तते। आचारः एव धर्मः[ii]। मानवस्य नैतिकता आचारेण सह सम्बन्धः वर्तते।

य:आचारहीन: भवति तं वेदमपि न शुद्धति।[iii]
आचारपालनाय सामाजिकचिन्तकै: ये विषया: निर्धारिता: तानेव विषयान् विद्वद्भि: नीतिकाव्येषु सङ्कलितम्। वस्तुत: नीति: जनान् कुमर्गं त्यक्त्वा सन्मार्गं प्रति नयति। नीतौ शुभाशुभादि विषया: समाहिता: भवन्ति। यदा शुभविषयस्य कल्पना क्रियते तदा स्वत: अशुभविषय: कल्पित: भवति। यदा अस्तीति ज्ञानं जायते तस्मिन्नेव समये नास्तीति ज्ञानमपि मनसि आयाति। उक्त: विषय: उपनिषदत्सु श्रेयप्रेय: मार्गभेदेन वर्णित:। कठोपनिषत्सु एतयो: द्वयो: विवेचनां कुर्वन् कथितं यत् मनुष्य: श्रेयप्रेयमार्गेण आबद्ध: भवति, यदा मनुष्य: श्रेयमार्गं चिनोति तदा तस्य कृते शुभ: इति मन्यते। किन्तु यदा मनुष्य: प्रेयमार्गं चिनोति तदा तस्य कृते अशुभ: इति मन्यते। एवं प्रकारेण श्रेयस्य सङ्केत: शुभ: अर्थात् सन्मार्ग:, प्रेयस्य सङ्केत: अशुभ: अर्थात् कुमार्ग:[iv]। श्रेयप्रेयमार्गभेदेन एव का नीति: का अनीतीति वक्तुं शक्यते। नीति: कल्याणप्रदा अर्थात् उत्थानस्य कारणमानीति: अर्थात्पतनस्य च कारणम्। स्मृतिग्रन्थेष्वपि श्रेयं श्रेष्ठमिति मन्यते। स्मृतिग्रन्थेषु श्रेष्ठं सदाचार: कथ्यते।

## नीतिकाव्यनीतिशास्त्रयोर्मध्ये भेद

यदि अस्माभि: नीतिकाव्यं नीतिशास्त्रत्वेन प्रयोग: क्रियते तदानीं तस्य अभिप्राय: इत्थं भवति यत् सन्मार्गे प्रवर्तनाय अनुशासितशास्त्रमेव नीतिशास्त्रम्। परन्तु नीतिशास्त्रनीतिकाव्ययोर्मध्ये भेद: अपि वर्तते इति मे मति:। यतोऽहि नीतिशास्त्रस्य अनुशासनेन बाध्यता इति नियम: निहित: वर्तते, तस्य च पालनं कर्तव्यमेव, न क्रियते चेत् प्रशासनिक दण्डविधानं वर्तते। नीतिशास्त्रानुसारं चौर्यकार्यम् अपराध: वर्तते। अत: नीतिशास्त्रे दण्डविधानं कल्पितम्। किन्तु नीतिकाव्ये प्रयुक्तकार्यस्य कृते दण्डविधानस्य बाध्यता नास्ति। तत्र सरलोपायेन व्यक्ते: जीवनस्य परिवर्तनम् आनेतुं प्रयत्न: क्रियते, किन्तु व्यक्ति: तस्य पालनं करिष्यति न वा तदपि स: एव निर्धारणं करिष्यति। करणीयम् इति बाध्यता नीतिकाव्ये कुत्रापि न दृश्यते। तेनैव कारणेन जना: नीतिकाव्यं पठने सहजेन प्रवृता: भवन्ति।

पूर्वमेवोक्तं यत् नीतिकाव्यनीतिशास्त्रे च शुभाशुभम्, उचितमनुचितम्, दुराचारसदाचारादिविषयकमध्ययनं भवति। यस्य लक्ष्यं सम्पुर्णसमाजाय भवति। अत: एव सदाचारविचारकै: मनुष्याणां कृते नीतिकाव्यनीतिशास्त्रस्य च निर्माणं कृतम्। नीते: उपरियुक्तां परिभाषां दृष्ट्वा नीतिकाव्यं नीतिदर्शनमपि वक्तुं शक्यते, नीते: सम्बन्ध: मानवत्वात्। तत्र धर्म:, राजनीति:, आर्थिकनीति:, सामाजिकव्यवस्था, शिक्षा, दैनन्दिनजीवनसम्बन्धितं सर्वं समाहितं भवन्ति। उपनिषदि उक्तं यत्-'सत्यं वद्, धर्मं चर्, मातृ देव भव, पितृ देव भव, अतिथि देव भव, स्वाध्यायान् मा प्रमद:।' आदि उपदेशा: उपर्युक्तविषयेन सह सम्बन्ध: अस्ति इति वक्तुं शक्यते। यदि राजनीति: नीतिमार्गम् अकरिष्यत् तर्हि मानवकल्याणेन सह समस्तराष्ट्रस्यापि कल्याणम् अभविष्यत्। नीतिविहीनराजनीति: अमानवीयव्यवहारकारणेन स्वयमेव नष्टं भवति, अत: राजनीति: नीतिं आधारितं भवितव्यम्।

## नीतिकाव्यस्योद्भवविकासश्च

नीतिकाव्यस्य प्राचीनता अपि च तस्योद्भवस्योपरि विचार: क्रियते चेत् ज्ञातुं शक्यते यत् सर्वप्राचीना: नीतिकाव्योपदेशा: संस्कृतवेदवाङ्गमयाश्रिता:, कथने नास्ति अतिशयोक्ति:, न केवलं भारतीया: विद्वांस: अपि तु भूवनप्रसिद्धा: पण्डिता: अमुं विषयं अङ्गीकारत्वात्। विश्वस्य प्राचीनतं ग्रन्थेषु वेदेषु विश्वज्ञानरत्नस्य समायोजनं कृतं येन मानवा: स्वजीवनयापयितुं पथप्रदर्शकरूपेण स्वीकुर्यु:। अनेन वेद: इति शव्द: स्वयं यथार्थसिद्ध: जात:। अर्थात् वेदस्यार्थ: समस्तज्ञानरशि:[v]।

उपयुक्तं कथनम् उचितमेव भाति, किमर्थमिति चेत् प्राचीनकाले यावत् ज्ञानविज्ञानम् आसीत् तावत् सर्वमपि वेदे समाहितम् अस्ति। अस्य कथनस्य पुष्टि: भवति अनेन यत् वेदे यज्ञविद्या, आध्यात्मिकविद्या, भौतिकविद्या, तथा मानवजीवनोपयोगीक्रियाकलापा: समाहिता: सन्ति। एवं च कृषि:, शिल्प:, वनस्पति:, विज्ञानानि, कला, गणितं ज्योतिषं तथा अयुर्विज्ञानस्य परमतत्वानि वेदगर्भितानि इति। एवं प्रकारेणोक्तं समस्तज्ञानविज्ञानेन सह एव मानवजीवनं सुसंगठितं, सुश्रृङ्खलितं च स्थापयितुं कर्तव्यानां पालनोपदेशोऽपि समाजस्य सर्वेभ्य: वर्गेभ्य: आवश्यकमेव[vi]। अस्मिन् धर्मस्याभिप्राय: व्यापकत्वेन स्वीकृतम्, संकुचितार्थे वैदिकसाहित्ये क्वचिदपि धर्मस्य प्रयोग: नास्ति। धर्मस्य अभिप्राय: तु मानवजीवनस्य सर्वाङ्गीणोत्कर्षेण उन्नत्या च सह वर्तते।

नीते: मूलाधार: धर्म: अर्थात् कर्तव्यपालनमेव मन्तव्यम्। वेदा: अपि आचारशुद्धिविषये वलं ददति। वेदे प्राणिषु समदृष्टिपातस्य नीते: स्पष्टोल्लेख: वर्तते। मानवेषु भेद: वेदस्य अभिष्टं नास्ति। यथा- 'मा कश्चिद् विद्विषा वहै'[vii] एतेन स्पष्टमिदम्।

इदमत्र अवधार्यं यत् सामाजिकी एकतायै समाजस्य सर्वेऽपि मानवा: परस्परसहयोगभावनया कार्यं कुर्यु:। किमर्थमिति चेत् समाजस्य एव न अपितु परिवारस्यापि विघटनमूलकारणं द्वेष: एव अत: द्वेषभावनाया: त्याग: एव वरम्। तथैव सम्बादहीनतापि विघटनस्य कारणम्, एतस्मात् रक्षेम एवं परस्परसंवाद: अनुवर्तनीय:, येन विद्वेष: नोत्पद्यते। एतत् उद्द्येश्यं मनसि निधाय वैदिक ऋषिभि: समाजस्य मनुष्येभ्य: एतत् उपदिष्टम्- यत् वयं सर्वे मिलित्वा चलेम:, वदेम:, तथा अस्माकं मनसि एका एव भावना निहिता भवेत्[viii]।

वैदिकसाहित्यान्तर्गते उपनिषत्स्वपि नीतिसम्बद्धानि वाक्यानि प्राप्यन्ते। ईशोपनिषदि स्पष्टरूपेण नीतिरियं प्रदर्शिता यत् मानवजीवनस्य उन्नतिः कल्याणञ्च त्यागन्तरेण न सम्भवति, लोभं त्यक्त्वा त्यागभावनया एव व्यक्तेः समाजस्य च कल्याणः सम्भवः। अतः एव त्यागपूर्वकजीवनं यापयन् लोभस्य त्यागः कर्तव्यः[ix]। धनं नश्वरं, तत् कस्यापि न भवति इयमेव नीतिः। तथैव इयं नीतिः अपि स्पष्टा यत् मनुष्येण कर्तव्यशून्यं न भवितव्यम्। कर्म कुर्वन् जीवितुम् इच्छा स्यात्[x]।

एतादृशानि वाक्यानि वैदिककालस्य नीतिं संकेतयन्ति, येषां सम्बन्धः धर्मः अर्थात् मानवजीवनस्य कर्तव्येन सह वर्तते। एवं प्रकारेण वैदिकयुगात् एव सामाजिकव्यवस्थां सुचारुरूपेण चालयितुं धर्मः कर्तव्यपालनमिति नीतिः स्वीकृता। वक्तुं शक्यते यत् नीतिसंहितायाः आचारानुभूतस्य दर्शनस्य मूलस्रोतः वेदे एव निहितः। अतः नीतिवाक्यानाम् उद्भवः वेदादेव इति नास्ति अत्र संशयः। सुक्तिरूपेण नीतिनाम् उल्लेखः वेदे स्पष्टरूपत्वात्।

## नीतेः मनोवैज्ञानिकविवेचनम्

वैदिकवाङ्मयादतिरीच्य संस्कृतसाहित्येऽपि नीतिसम्बद्धाः सूक्तयः आधिक्येन दरीदृश्यन्ते। तानेव सूक्तीः आधारीकृत्य नीतेः मनोवैज्ञानिकं मूल्याङ्कणं कृतम्। मनोवैज्ञानिकशब्दस्य तात्पर्यमेतत् वर्तते यत्- कस्यापि प्राणिनः व्यवहारक्रियाकलापं समावलोक्य तस्य अदृश्यमानक्रियाकलापज्ञानं येन प्राप्तिर्भवति अर्थात् मनसः विशिष्टज्ञानस्य प्रतीतिः येन भवति तदेव मनोविज्ञानमिति निगद्यते मनसः विज्ञानं मनोविज्ञानम्। मनः एव मानवस्य क्रियाकलापस्य मूलं वर्तते। अतः एव "मनो नाम संकल्पविकल्पात्मिकान्तःकरणवृत्तिः"[xi] इत्थं मनसः परिभाषा भवति। अस्याः परिभाषायाः अधारेण एव निश्चयं कृतवन्तः यत् बन्धनमोक्षयोः कारणं मनः एव। मनोविज्ञानाध्ययनस्य अभिप्रायः वर्तते यत्- भिन्न-भिन्नः परिस्थितौ मनसः का दशा वर्तते तस्य ज्ञानं हि मनोवैज्ञानिकाध्ययनम्। मनसि इच्छायाः समुत्पन्नः भवति एवञ्च तदनुसारेण मनुष्ये प्रवृत्तिः निवृत्तिः वा भवति। एतत् सर्वमपि मनसि निधाय नीतिकारैः स्वीयनीतिग्रन्थेषु नीतयः प्रकटीकृताः। भतृहरिणा नीतिशतके उक्तमस्ति यत्- विद्यायालङ्कृतोऽपि दुर्जनः सर्वदा वर्जनीयः [xii] । सकलविद्यापारीणः सन्नपि दुष्टो विद्वान् दूरतः एव परिहर्तव्यः। कुतः इत्यत्र आह- फलकस्थमाणिक्येनालंकृतः सन्नपि सर्पः किं भयप्रदो नास्ति अर्थात् भयंकरः एवेत्यर्थः।

एतदेव कथनं मनोविज्ञानं प्रति संकेतं करोति, कुतः इति चेत् कामपि व्यक्तिं दृष्ट्वा तस्य सज्जनत्वं दुर्जनत्वं वा ज्ञातुं न शक्यते, यावत् पर्यन्तं तस्य क्रियाकलापमवलोक्य अध्ययनं न क्रियते। अध्ययनेऽस्मिन् मनसि प्रवृत्तीनां सूक्ष्मविश्लेषणमन्तर्निहितं वर्तते। एतदेव विषयः नीतिकाव्यकाराणां मुख्यो विषयो भवति। यदा अस्माभिः कोऽपि जनः दृश्यते चेत् तदा तं दृष्ट्वा सः प्रशन्नः उत् क्रोधितः इति ज्ञातुं शक्यते तस्य भावक्रियाकलापत्वात्। दृष्टान्तत्वेनाभिज्ञानशाकुन्तले नाटके उच्यते-"सत्वानामपि लक्ष्यते विकृतिमच्चितं भयक्रोधयोः"[xiii]।

अर्थात् जन्तुनामपि भयक्रोधादीनामवस्था मनोविज्ञानकारणेन ज्ञायते। यस्य सम्बन्धः (भयक्रोधादि) मनुष्यैः आचरणेन सह वर्तते। जन्तुनामाचरणं दृष्ट्वा मनसि तत्प्रकारकं ज्ञानं प्राप्तिः एव मनोविज्ञानम्। आचरणस्य सम्बन्धः समाजे मनुष्यैः सह वर्तते। अतः नीतिकारैः मनुष्यानां आचरणं दृष्ट्वा एव नीतिशास्त्रे स्वविचारः प्रकटीतः। विचार्यते चेत् समाजस्य प्रत्येकं जीवे सुखदुःखभावना अन्तर्निहिता सन्ति। सुखदुःखात् मनुष्यः सुखमेव वाञ्छति, न तु दुःखम्। सुखकारणात् मनुष्यः प्रसन्नः भवति दुःखेन मनुष्यः मलीनः भवति। एतत् सर्वं दृष्ट्वा नीतिकारैः नीतयः कृताः। इत्थं नीतिनां मनोविज्ञानस्य च सम्बन्धः महत्वपूर्णम् मन्यते। कुतः इति चेत्- मनसः विविधः संकल्पाः, इच्छाश्च समुपद्यन्ते, यस्य विश्लेषणं कृत्वा परिस्थित्यनुसारं नीतिकारैः नीतयः उक्ताः। येन इतरेभ्यः जनेभ्यः तदीयानां परिस्थितीनां ज्ञानं भवेत्। एवं प्रकारेण मानवमनसोऽनुभूतीनां ज्ञानम् अथवा अध्ययनं नीतिवचनानि सार्थकीकुर्वन्ति। अस्य विज्ञानस्यान्तर्गतत्वेन न केवलं मनुष्याः आयान्ति अपितु पशु-पक्षिनामपि समावेशात्र भवन्ति। एतत्सर्वमाधारं मत्वा जनसामान्येभः नीतयः परिकल्पिताः। एकः कुक्करः कथं स्वमनसा स्वामिनं निकषा स्वस्य इच्छां प्रकटयति[xiv], एकमुदाहरणेन मनोवैज्ञानिकनीतिं स्पष्टीक्रियते- सारमेयः पिण्डदस्य पुरस्तात् पुच्छविवर्तनं भूतले चरणावपातं भूमौ स्वयमेव पतित्वा वदनदर्शनं च करोति। किन्तु पिण्डदसंनिधावपि गजेन्द्रः गम्भीरं अनेकानुनयवचनानन्तरं च कथञ्चिद् खादति इमावेव नीचानीचजनयोर्दृष्टान्ताविति भावः। अत्र कुक्कुरः गजस्य च चेष्टाधारेण तदीया इच्छा प्रकटीकृताः, यत् द्वयोः भिन्नः भिन्नः जीवयोः मनसस्थितिः कथं भवति, एतदेव अत्र मनोवैज्ञानिकनीतिः माध्यमेन प्रदर्शिताः।

महाकविः शूद्रकः अपि मृच्छकटिकप्रकरणे मनोवैज्ञानिकनीतिनां समावेशं कुर्वन् सजीवचित्रणं प्रस्तौति, तदद्वितीयोऽस्ति। धनसम्पन्नात्परं निर्धनं भवति चेत् या स्थितिरायाति तदीय मनसो दशाः चित्रिताः। तेन मनोवैज्ञानिकेन सह सामाजिकशिक्षाऽपि दीयते। मृच्छकटिके चारुदत्तः ब्रूते यत्- एतत् निरधनत्वं सुखानुभवात्परं यदायाति यदा मनुष्यः शरीरं धृत्वापि मृतवत् भवति। किन्तु दुःखानुभवात्परं यदा सुखस्थितिः आयाति तदा मनुष्यः: आनन्दितः अनुभवति[xv]।

निर्धनव्यक्तेः मानसिकावस्था महती दयनीया भवति। सः उत्कृष्टचिन्तनं कुर्वन् अपि सर्वत्र तिरस्कारस्य पात्रं भवति। अन्ते सः मरणमेव वरमिति मन्यते। तस्य मानसिकस्थितिः विक्षिप्ता भवति। सः चिन्तयति द्रारिद्रतापेक्षया मृत्युरेव

गरीयसी। स: चिन्तयति मृत्यो: कष्टं क्षणिकं किन्तु दारिद्रताजीवनं कष्टं प्रददाति[xvi]। निर्धनावस्थायां या मानसिकी स्थिति: भवति, सैव जानति य: निर्धन: नेतर:। इत्थं भावं मनोवैज्ञानिकाध्ययनेन एव प्रकटीकर्तुं शक्यते। धने नष्टे सति नास्ति कापि चिन्ता, किमर्थं चेत् धनं तु भाग्यवशात् आयाति गच्छति च। किन्तु कष्टं तदा एव अनुभूयते यदा धनाभावात् स्वजाना: अपि दूरं प्रति गच्छति[xvii]। निर्धना व्यक्ति: स्वविपन्नावस्थायां ध्यायति यत् निर्धनत्वमेवं वस्तु: यत् सर्वप्रथमतया लज्जा प्रबला जायते, लज्जाया: तेजो नष्टं भवति, तेजस: नष्टत्वात् सम्मानं गच्छति, सम्माननष्टे ग्लानि:, ग्लाने: शोकप्राप्तिर्भवति। इत्थं यदा व्यक्ति: शोकभूता भवति तदा तस्य विवेकोऽपि नष्टं भवति। विवेके नष्टे सति पतनं निश्चितम्। अत: एतस्मात् स्पष्टीभवति यत् निर्धनत्वं सर्वेषां मूलकारणम्। निर्धनत्वं मनुष्यस्य अभिशापत्वेन मन्यते। निर्धनमनुष्यस्य सर्वमपि क्षणमात्रेण विनष्टं भवति[xviii]।

निर्धनजीवनं कियत् भयमय: अपमानजनकश्च अस्ति इति विषये मनोवैज्ञानिकचित्रणं कुर्वन्नेव कवि: नीतिं उघोषयति यत्- निर्धनात्मुक्तिं भवितुं उद्योगशीलां भूत्वा धनलाभाय प्रयास: विधेय: परन्तु विवेकं अपरित्यज्य। कुत: इति चेत् नष्टे भूतेऽपि मनुष्यपतनमार्ग: स्वत: प्रसस्तोऽपि भवति।

अभिज्ञानशाकुन्तलेऽपि महाकविना कलिदासेन मानसिकस्थितेस्सजीवमनोहरवर्णनाकारि। शकुन्तलां दृष्ट्वा दुष्यन्तस्य मनसि आकर्षणस्योत्पत्ति: भवति, एवञ्च असौ ध्यायति यत् किमियं आजीवनं तप: कुर्वाणा भविष्यति? किमस्या: विवाह: केनापि ऋषिणा सार्धं भविष्यति? दुष्यन्त: तां दृष्ट्वा चिन्तयति शकुन्तला ब्राह्मणकूलजा उत क्षत्रियकूलजा? इथ्यं नैकस्यां स्थितौ सत्यां स्वान्तरिकभावनाया प्रेरितं भूत्वा चिन्तयति यत्- कन्येयं निश्चितरूपेण क्षत्रियकुलजा। कुत: इति चेत् मे महत् मन: अस्यामुपरि आकर्षितम्। विषमपरिस्थितौ सतां मनस: प्रवृत्ताय एव प्रमाणम्[xix]|

## उपसंहार

इत्थं नीतिकारै: न केवलं बाह्यपक्षं ध्यानं दत्तम्, अपि तु मनुष्यस्य आन्तरिकपक्षस्याप्यध्ययनं कृत्वा नीतय: प्रणीता:। एवं प्रकारेण नीतिकारै: निजानुभूतय: प्रोक्ता:। अस्यान्तर्गमनुष्यस्य बाह्यव्यवहारमवलोक्यान्तर्मनस: नीतय: उक्ता:। नीतिकारै: निजानुभूतमनुष्यान्तरस्थले समुत्पन्नविचार: प्रोक्ता:। अमूषां नीतिनां माध्यमेन नैतिकज्ञानं लभते यत्- मनुष्यान्तरिकमनोभावेषु किद्दक् विचार: आयाति गच्छति च। मनुष्यस्य सदासत् चिन्तनस्य विवेचनं नीते: मनोवैज्ञानिकाध्ययनेन सम्भवति।

## सन्दर्भ


1. मिश्र:, राजदेव. (सम्पा.).अभिज्ञानशाकुन्तकम्. घनश्यामदास एण्ड सन्स. चौक फैजाबाद. २००० ई.
2. शङ्करभाष्यार्थ, ईशादि नौ उपनिषद. गीताप्रेस. गोरखपुर. सं. २०६६.
3. अवस्थी, सुरेशकुमार.नीतिशतकम्. चौखम्बा प्रकासन. वाराणसी. सं. २०७३.
4. शास्त्री, राजवीर. (सं). कुमार, सुरेन्द्र. (अनु.). मनुस्मृति. आर्ष साहित्य प्रचार ट्रस्ट. नई दिल्ली. २०००.
5. त्रिपाठी, जयशङ्करलाल. मृच्छकटिकम्. कृष्णदास अकादमी. वाराणसी. २००२.
6. मिश्र, जगदीशचन्द्र. (व्याख्या.). शुक्रनीति. चौखम्बा सुरभारती प्रकशन. वाराणसी. २०१९.


---

[i] शुक्रनीति: १/१५७

[ii] मनुस्मृति: १/१०८

[iii] आचारहीनं न पुनन्ति वेदा यद्यप्यधीता:....। वसिष्ठस्मृति: ६/३

[iv] अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीत:।
तयो: श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥ कठोपनिषद् २/१

[v] स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि स:। मनुस्मृति:२/७

[vi] वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥ मनुस्मृति: २/६

[vii] ईशोपनिषद् १

[viii] संगच्छध्वं संवदध्वं संवो मनांसि जानताम्। ऋग्वेद १०/१६१/२

[ix] तेन त्यक्तेन भुञ्जीथा मा गृध कस्यचिद् धनम्। ईशोपनिषद् १

[x] कुर्वन्नेवेह कर्माणि जिजीविषेच्छतम् समा:। ईशोपनिषद् २

[xi] वेदान्तसार:

[xii] दुर्जन: परिहर्तव्यो विद्ययालङ्कृतोऽपि सन्।
मणिना भूषित: सर्प: किमसौ न भयङ्कर:॥ नीतिशतकम् ५४

[xiii] अभिज्ञान शाकुन्तलम् २/५

[xiv] लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते, गजपुङ्गवस्तु
धीरं विलोकयति, चाटुशतैश्च भुङ्क्ते॥ नीतिशतकम् ३२

[xv] सुखं हि दु:खान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां धृत: शरीरेण मृत: स जीवति॥ मृच्छकटिकम् १/१०

[xvi] दरिद्रयान्मरणाद्वा मरणं मम रोचते न दारिद्रयम्।
अल्पक्लेशं मरणं दारिद्रयमनन्तकं दु:खम्॥ मृच्छकटिकम् १/११

[xvii] सत्यं न मे विभवनाशकृताऽस्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत् सौहृदादपि जना: शिथिली भवन्ति॥ मृच्छकटिकम् १/१३

[xviii] दारिद्रयाद्धियमेति हीपरिगत: प्रभ्रश्यते तेजसो
निस्तेजा: परिभूयते, परिभवान्निर्वेदमापद्यते।
निर्विण्ण: शूचमेति शोकपिहितो बुद्धया परित्यज्यते
निर्बुद्धि: क्षयमेत्यहो निर्धनता सर्वापदामास्पदम्॥ मृच्छकटिकम् १/१४

[xix] असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मन:।
सत्तां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्त: करण प्रवृत्तय:॥ अभिज्ञानशाकुन्तलम् १/२२